पार्वतीगीतम्

रचयिता

श्रीजयनारायणघोषालः

सम्पादकः

डॉ० प्रभातशास्त्री

12148

योऽनूचान स नो महान्
राष्ट्रिय संस्कृत संस्थान

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

पुस्तक संख्या ....

वर्गीकरण संख्या ....

12158

स॰ सा
राष्ट्रिय संस्कृत संस्थान
पुस्तकालय
क्रमांक.........................

राष्ट्रिय संस्कृत संस्थान, जयपुर
परिसर

वर्गीकरण सं. ....

पुस्तक सं. 12158 दिनाङ्क..................

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

पार्वतीगीतम्

PRESENTED BY THE MINISTRY OF
HUMAN RESOURCE DEVELOPMENT
GOVERNMENT OF INDIA

रचयिता
श्रीजयनारायणघोषालः

सम्पादकः
डॉ० प्रभातशास्त्री

प्रकाशकः
कौशाम्बीप्रकाशनम्
दारागंज, इलाहाबाद-६

प्रथमसंस्करणम्
संवत् २०४२
मूल्यम् पञ्चमुद्राः

मुद्रकः
देववाणीमुद्रणालयः
इलाहाबाद-३

PARVATIGEETAM

राष्ट्रिय संस्कृत संस्थान
पुस्तकालय
क्रमांक 12148

By

Sri Jayanarayan Ghoshal

Editor

Dr. PRABHAT SHASTRI

Published By
Kaushambi Prakashanam
Daraganj, Allahabad-6

First Edition
1985
Price 5.00

Printed At
Devavani Mudranalaya
Allahabad-3

भूमिका

प्रस्तुतरागकाव्यस्य प्रणेतुः जयनारायणघोषालमहोदयस्य जन्मस्थली कलकत्तानगरोपकण्ठं गोविन्दपुरनामको ग्रामो वर्तते। ग्रामोऽयं प्रसिद्धफोर्ट-विलियमकालेजस्य सन्निकटे आसीत्। तस्मिन् ग्रामे कन्दर्पघोषालनामकः वैभवशाली ब्राह्मणो वसति स्म। तस्य ज्येष्ठसुतस्य नाम कृष्णचन्द्र आसीत्। अयमेवाऽस्य चरितनायकस्य जनकः।

अस्य विद्वद्वर्यस्य जन्म १७५१ ईशवीयवर्षस्य सितम्बरमासेऽभवत्। कालान्तरेण यदा फोर्टविलियमकालेजस्य विस्ताराय सञ्चालकानां भूमेरावश्यकता सञ्जाता तदा तद्ग्रामस्तत्रैव विलीनो बभूव। पुनः कियत्कालपर्यन्तं वेहालगढी ग्रामे निवासं विधाय तदनन्तरं १७५३ ईशवीये वर्षे खिदिरपुरनामके ग्रामे स्वकीयचिरस्थायिनिवासार्थैतत्पितृपादः भूकैलाशनामकं भव्यं भवनं निर्मापयामास।

प्रस्तुतकृतिनिर्माता जयनारायणघोषालः षोडशवर्षाऽवस्थायामेव अंग्रेजी हिन्दी-फारसीबंगलासंस्कृतभाषासु प्रभूतप्रावीण्यमधिगतवान्। अस्य पुत्रः कालीशङ्करघोषालमहोदयः एकस्मिन् विशालकाये ताम्रपत्रे आंग्लफारसीभाषासु स्वकीयकुलस्योत्पत्तिविवरणमुट्टङ्कितवान्। एतेन ताम्रपत्रविवरणेन तथा तदानीन्तनभारतवर्षस्य प्रधानशासकलार्डहेस्टिंग्जमहोदयस्य गोपनीयपत्रावलीतोऽस्य कुलविषये कार्यकलापसम्बन्धे च परिचयः प्राप्यते। हेस्टिंग्जमहोदयः कलकत्तानगरात् नौकया आगरानगरं जिगमिषुः सन् १८१४ ईशवीयवर्षे अगस्तमासस्य २६ दिनाङ्कादारभ्य सितम्बरमासस्य ८ दिनाङ्कपर्यन्तं वाराणसीमध्युवास।

वाराणसीनिवासकाले लार्डमहोदयः काशीनगरस्य रोचकं मनोमोहकं वर्णनं मनोयोगेन लिलेख। तत्र जयनारायणघोषालमहाशयेन स्वस्थापितपाठशालायाः चिरस्थायित्वाय कृतस्य प्रबन्धसमर्पणस्य चर्चा वरीवर्ति।

अस्य वंशावले: रूपरेखा काशीत: प्रकाशितायां सांप्रतमस्तङ्गतायां हंस-पत्रिकायां व्रजजीवनदासमहोदयेनैकस्मिन् लेखे इत्थं प्रदत्ता—

रामकृष्ण:

रामदुलालपाठक:	कंदर्पघोषाल:
रामनिधि:	
रामलोचन:	

कृष्णचन्द्र:	गोकुलचन्द्र:	रामचन्द्र:
महाराजजयनारायणघोषाल:	वृन्दावनचन्द्र:	रामनारायण:
	हरिनारायण:	लक्ष्मीनारायण:
राजाकालीशङ्करघोषाल:	गंगानारायण:	

वंशवृक्षोऽयमस्य काव्यस्याऽन्ते ग्रन्थकारप्रदत्तेन श्लोकात्मकेन स्वकुलसंस्तवेन सह किञ्चित् सादृश्यं भजते। ते च श्लोका: पाठकानां पुरत: प्रस्तूयन्ते। यथा—

आसीत् ब्रह्मकुलोद्भूत: शिरोनाम महामति:।
तस्माज्जात उधो धीरस्तत: कोच इति स्मृत:॥

तत आभ: समाजज्ञे सञ्जातश्च ततो यश: ।
उदयश्च ततो जातस्ततो वाणेश्वरोऽभवत् ।।
तत्पुत्रो विश्वनाथोऽथ कंसारिस्तत्सुतो महान् ।
कंसारेस्तनय: श्रीमान् श्रीधर: परिकीर्तित: ।।
यदुनाथस्ततो जज्ञे पाठकख्यातिमीयिवान् ।
गोपीकान्तस्तस्य पुत्रो रामकृष्णश्च तत्सुत: ।।
राजेन्द्रस्तनयस्तस्य विष्णुदेवस्ततोऽभवत् ।
दुलालश्चाऽपि कन्दर्पो विष्णुदेवसुतावुभौ ।।
कन्दर्पात् कृष्णचन्द्रोऽभूद् गुणवान् विजितेन्द्रिय: ।
अभवत् कृष्णचन्द्रस्य जयनारायण इति स्मृत: ।।
अजायत सुतस्तस्य कालीशङ्करसंज्ञक: ।
तस्य षट् तनया: ख्याता: काशीकान्तोऽग्रजो महान् ।।
सत्यप्रसादस्तदनु तृतीय: सत्यकिङ्कर: ।
चतुर्थ: सत्यचरणो घोषाल: परिकीर्तित: ।।
पञ्चम: सत्यशरण: षष्ठ: सत्यप्रसन्नक: ।
इति षण्णां कुमाराणां सत्यभक्तस्तु सप्तम: ।।

उपर्युक्तवंशवृक्षेण सह समाना नामावलि: पाठकानां सौकर्य्याय मया रेखाङ्किता । अनया वंशवृक्षेषु प्रदत्तनामावलिनामसु वैमत्यं कथं वरीवर्तीति ताम्रपत्राऽवलोकनेनैव स्पष्टं भविष्यति ।

एतेन पद्यात्मकेन परिचयेन प्रतीयते यत् जयनारायणघोषालमहोदयो जात्या ब्राह्मण आसीत् । किन्तु स्वर्गीय डॉ० मोतीचन्द्रमहोदयेन 'सम्पूर्णानन्द अभिनन्दन' नामकग्रन्थे 'काशी की प्राचीन शिक्षापद्धति और पण्डित' इति शीर्षके लेखे जयनारायणघोषालमहोदयो जात्या 'अब्राह्मण' इत्युद्घोषितम्—तदप्रामाणिकम्[1] । उपर्युक्तवंशवृक्षेण समानतामधिगतानां नाम्नामंशो मया पूर्वमेव रेखाङ्कित: :

1—द्रष्टव्यम्—सम्पूर्णानन्द अभिनन्दनग्रन्थस्य पृष्ठम्—५७ ।

प्रस्तुतरागकाव्यस्य लेखकः जयनारायणघोषालमहोदयः त्रयोदशवर्षावस्थायामेव तत्कालीनबंगप्रदेशस्य नवाबमुबारक उद्दौलायाः कर्मचारी अभवत्। घोषालमहोदयः अनेकभाषायाः ज्ञाता आसीत्। तदानीन्तनस्य कलकत्तानगरस्य पुलिससुपरिण्टेण्डेण्ट जॉन शेक्सपियरमहोदयस्य समक्षे स्वकीययोग्यतायाः परिचयं प्रदाय तस्य प्रियपात्रतामधिजगाम। तत्संरक्षकत्वे कार्यमपि चकार। शेक्सपियरमहोदयस्य संरक्षकत्वे अनेकस्थानेषु कार्यं विधाय अस्वास्थ्यवशात्स्वगृहमाजगाम। अंग्रेजशासकाः एतदीयकार्यकलापात् प्रसन्ना भूत्वा प्रयत्नेन दिल्लीश्वरमुहम्मदजहाँदारशाहमहोदयात् महाराजबहादुर तीन हजार मनसबदारीतिपदवीमपि दापयामासुः। मुगलशासनकाले कस्याऽपि व्यक्तिविशेषस्य महत्त्वद्योतकोऽयमुपाधिः। अस्य उपाधेः प्रामाणिकतां सन् १७८० ईशवीये वर्षे शहजादा मिर्जा जवावक्तमहोदयोऽप्यकरोत्। समाजे स्वकीयप्रतिष्ठाप्राप्तये जयनारायणघोषालमहोदयेन तात्कालिकबंगप्रदेशीय आङ्ग्लप्रशासकमिस्टर केमेक मिस्टर टामस पटेल मुर्शिदाबादस्य नवाबबाबरजंगबहादुरमहोदयानाञ्च प्राशासनिककार्यकलापेषु महती सहायता विहिता। अनेन कार्येण घोषालमहोदयेन स्वसमाजेषु महती प्रतिष्ठा वैभवशालिता च प्राचुर्येण प्राप्ता। वैभवशालितायान्तु अस्य महाभागस्य कलकत्तानगरे महती ख्यातिस्सञ्जाता। धार्मिकप्रवृत्तिशालिनाऽनेन कलकत्तानगरे मन्दिराणान्निर्माणमपि कृतम्। एतेषां मन्दिराणां पूजनादिव्यवस्थायै भूमिदानमपि विहितम्। ततः स्वकीयखिदिरपुरनामकग्रामसमीपे भूयस्यो भूमयोऽपि क्रीताः। ततो गच्छत्सु दिनेषु महत्सु भूमिपतिषु घोषालमहोदयस्य गणना सञ्जायते स्म। सन् १७७९ ईशवीयवर्षे कालीघाटस्थितसुप्रसिद्धकालीदेव्याः मूर्तेः हस्त चतुष्टयं रजतावृतं कनकावृतञ्चानेन कारितम्। अनन्तरं बह्वीनां देवमूर्तीनां स्थापनमप्यकरोत्। अस्यैव पार्श्वे घोषालमहोदयेन शिवगंगानामकं सरोवरमपि निर्मापितम्। अनेन करुणानिधाननामिका राधाकृष्णस्य मूर्तिरपि स्थापिता। कलकत्तानगरे एतत् सर्वं कार्यकलापं विधिपूर्वकं संपाद्य पुनः सन् १७९४ ईशवीयवर्षे अयंजनः मोक्षभूमि काशीनगरीं समाययौ। समागत्य अत्रत्यानां जनानां

मध्ये शिक्षाया: प्रचाराय प्रसाराय च एकस्य विद्यालयस्य १८१७ ईवीयशवर्षे स्थापना कृता । यः साम्प्रतं वाराणसीपुरे जयनारायण इण्टर कालेज इति नाम्ना प्रथितोऽस्ति । पुरा विद्यालयेऽस्मिन् योग्यतमानामेवच्छात्राणां प्रविष्टिर्भवतिस्म । विद्यालयस्य साधु संचालनाय घोषालमहोदयः स्वयमेव १८१८ ईशवीयवर्षे काशीस्थ ईसाईमताऽवलम्बिजनसञ्चालितचर्चसोसायटीसञ्चालकेभ्यः इमं ददौ । तेन तदात्वेऽस्य विद्यालयस्य गणना उत्तरप्रदेशस्य श्रेष्ठविद्यालयेष्वासीत् । भारतीयच्छात्राणामाङ्ग्लभाषाऽध्ययनस्य शोभना व्यवस्थाऽत्र आसीत् । अस्यैव विद्यालयस्यच्छात्रः हिन्दीभाषायाः महाकविः श्रीसुमित्रानन्दनपन्तमहाभागः आसीत् । जस्टिस सैयद महमूदमहोदयेन आङ्ग्लभाषायां लिखिते 'हिस्ट्री आफ् इंङ्गलिस एजुकेशन' नामके ग्रन्थे घोषालमहोदयः आङ्लभाषाप्रचारकप्रसारकरूपेणोल्लिखितोऽस्ति । अनेकभाषाविदुषः घोषालमहोदयस्य काशीनगरीं संस्कृतभाषां प्रति च महती आस्था आसीत् । अस्मात् कारणादेव घोषालमहोदयेन अनुवादेन सार्धं सम्पूर्णकाशीखण्डः काशीपरिक्रमानामकग्रन्थश्च प्रकाशितः । काशीपरिक्रमायान्तु वाराणसीनगरस्य सांस्कृतिकसामाजिकजीवनस्य दर्शनं चित्रितमस्ति । अनेन संस्कृतभाषायां ब्राह्मणार्चनचन्द्रिका जयनारायणकल्पद्रुमः पार्वतीगीतञ्चेति ग्रन्थत्रयं तथा वंगभाषायां कृष्णचरित्रचित्रणात्मकं करुणानिधानविलासनामकं काव्यञ्च प्रणीतम् ।

वाराणसीनगरे शारदापीठे गुरुधाममन्दिरस्य निर्माणमपि श्रीघोषालमहोदयेन कारितम् । अस्य प्रशस्तौ श्रीकविराजगोपीनाथमहोदयेन यल्लिखितं तत् तन्मन्दिरमहत्त्वप्रख्यापनेऽत्यन्तं प्रभावमुत्पादयति । श्रीआनन्दमयी माँ देव्याः प्रेरणामङ्गीकृत्य श्रीकविराजमहोदयः स्वीये लेखे उट्टङ्कितवान् यदिदं मन्दिरं न केवलं प्रस्तरमूर्तिनिवासभूतमपि तु मानवभावभूमिकायाः प्रातिनिध्यमाख्यापयत् प्रतीकात्मकं स्वरूपमस्ति । पाठकानां कृते ग्रन्थकारश्रीजयनारायणघोषालविषये समासेन संस्तवं संप्रदाय प्रस्तुतकृतिपार्वतीगीतविषये किमपि कथयामः ।

रागकाव्यमिदं पार्वतीगीतं महाकविजयदेवस्य गीतगोविन्दपरम्परायां प्रणीतं

वरीवर्ति। अस्मिन् काव्ये द्वादशपटलानि सन्ति। अत्र शिवस्य शिवायाश्च स्तोत्रपात्रं पवित्रं चरित्रं सरलसरसभाषायां वर्णितं वर्तते। अस्य काव्यस्य स्फीते गीते शब्दप्रयोगपटिमा भाषायां म्रदिमा च पदे पदे राराजते। ग्रन्थकारेण अस्मिन् रागकाव्ये सर्गस्य अध्यायस्य वा प्रयोगं न विधाय पटलशब्दस्य प्रयोगो विहितः। पटलशब्दस्य प्रयोगः प्रायः तन्त्रग्रन्थेषु भवति। वस्तुतो भक्तिभाव भूतिः लघुकायेयं कृतिः यत् किञ्चित् तान्त्रिकसिद्धान्तप्रभावेण प्रभाविता वरीवर्ति। अस्मात् कारणादेव कविना प्रारम्भिके 'जय जगदम्ब शिवे[१]!, इति गीते बगलामुखि; 'छिन्न मस्ते!' 'भैरवि!' 'भुवनेश्वरि!' तारे!' प्रभृतिशब्दानां प्रयोगः पार्वत्याः सम्बोधने विहितः। अनेन प्रयोगेण जगज्जननीभूतायां पार्वत्यां दुर्गायाञ्चाऽभेदात्मिका मतिः स्पष्टरूपेण कवेः दन्ध्वन्यते।

मया पूर्वं प्रतिपादितं यद् रागकाव्यमिदं गीतगोविन्दपरम्परायां प्रणीतमस्ति। अतोऽस्मिन् काव्ये तद्वत् बहूनि रसरञ्जितानि गीतानि अनवद्यानि पद्यानि च विलसन्तितराम्। तेषु शाब्दिकचमत्कारभूतमेकं पद्यमवलोक्यताम्—

ज्ञानानन्दनरूपिका शिवमनस्सन्तोषिका शोषिका,
पापानामथ पोषिका त्रिजगतामुत्पादिका हारिका।
भक्ते मुक्तिविधायिका रिपुकुलप्रोन्माथिका दीपिका,
या मोहप्रबलान्धकारहरणे सा पातु वश्चण्डिका॥

दशमपटले ५२ संख्यकश्लोकः।

एतादृशोऽपरोऽप्येकः श्लोकः पठनीयः। कविः जगज्जननीं पार्वतीं विविधरूपमयीति स्वीकरोति। तद् यथा—

या बुद्धिः प्रतिभा दया हुतभया माया च मेधा सुधा,
तुष्टिः पुष्टिरपि क्षमा च विकृतिः शान्तिश्च कान्तिस्तृषा।
मुक्तिर्मुक्तिरथोक्तिराकृतिरपि श्रद्धा च विद्या त्रपा,
निद्रा सर्वशरीरिणामवतु सा विश्वं सदा शङ्करी॥

एकादशपटले ५७ संख्यकश्लोकः।

१—द्रष्टव्यम्—पार्वतीगीतस्य पृष्ठम्—२।

अस्मिन् काव्ये विद्यमानानामेतादृक्श्लोकानां गीतानाञ्चावलोकने-नाऽध्ययनेन च प्रतीयते यदस्य कविवर्यस्य संस्कृतभाषायाः उपरि महानधिकारः आसीत्।

अमन्दानन्दे जयदेवस्य गीतगोविन्दे सर्वेषामृतूनां वर्णनन्नैव दरीदृश्यते। कविना गीतगोविन्दे केवलम् ऋतुराजवसन्तस्यैव वर्णनं विहितम्। तत्प्रभावेण प्रभावितानां प्रणीतानां समेषां रागकाव्यानामपीयमेव स्थितिः प्रायः नयन-गोचरी भवति। मम कथनस्याऽयमाशयोऽस्ति यदस्मिन् रागकाव्येऽपि केवलम् ऋतुराजवसन्तस्यैव कविकृतं वर्णनमस्ति। अन्येषाम् ऋतूनां वर्णनन्नैवाऽस्ते। सहृदयहृदयसवेद्यं वसन्तवर्णनं पठ्यताम्—

परमुन्मदमिथुनकपालम् ।
विलसति विरहितजनकृततापं
मधुसमये हरनगरवनम् ॥ ध्रुवपदम्

भ्रमरकदम्बविचुम्बितमल्लीवल्लीरचितनिकुञ्जम् ।
रमणीमण्डलमानविखण्डनपण्डितपरभृतगुञ्जम् ॥१
मनसिजनृपतिच्छत्रसदृशनवविकसितसितशतपत्रम् ।
सुमधुरनिनदपतगवरमागधविपठितमदनचरित्रम् ॥२
मारुतचालितचामररुचिरशिरीषकुसुमसुविकाशम् ।
चित्रितविमलध्वजरवसुन्दरकेसरनिकरविलासम् ॥३
शरदुपशीलनशीतपवनदरकम्पितविकसितबकुलम् ।
युवजनभेदनलोहितप्रक्षितशरनिर्भकिंशुकमुकुलम् ॥४
पुष्पितसुललितनवमल्लीपरिरम्भिततरुणतमालम् ।
स्तबकपयोधरनम्रमनोहरनवकाशोकसुमालम् ॥५
कुड्मलपुलकितचूतविलोकनमाधविकाकृतहासम् ।
पथिकहृदयतटपाटनपटुतरकेतकगणकर्णाशम् ॥६
अभिहितमेतज्जयनारायणकविना परमरहस्यम् ।
कुरुतां मुदितं परमविरामं बुधगणहृदयमवश्यम् ॥७

षष्ठपटले पृष्ठसंख्या १८।

यद्यप्यस्मिन् गीते महाकविजयदेवस्य वसन्तवर्णनात्मके गीत इव शाब्दिकं सौन्दर्यं माधुर्यं लालित्यञ्च भावुकैर्नाऽनुभूयते तथाऽपि कवेर्भाषायामधिकारस्तु प्रत्यक्षं प्रतीयते इत्यत्र नाऽस्ति सन्देहलवः। एतादृशानि सहृदयहृदयहारीणि बहून्यन्यानि गीतानि प्रस्तुतकाव्येऽपि वर्तन्ते यानि विस्तरभिया नोद्ध्रियन्ते। एतत्कृते रसज्ञाः काव्यमर्मज्ञाः पाठकाः इदं काव्यमधीत्यामन्दमानन्दमनुभवन्तुतराम्।

अस्मिन् काव्ये एकाऽपराऽपि विशेषता वरीवर्ति यन् मुगलकाले सङ्गीतक्षेत्रे प्रत्नानां शास्त्रीयरागाणान्नामसु किञ्चित् परिवर्तनेन सार्धं कतिपयानां नूतनरागाणां सर्जनं सञ्जातमिति मर्मज्ञाः विज्ञाः सङ्गीतशास्त्रविचक्षणाः प्रणिगदन्ति। तेषां रागाणामिहाऽपि प्रयोगो दरीदृश्यते।

सप्तदशशताब्द्यां साकेतनगरे भगवतो रामचन्द्रस्य रसिकोपासनासंप्रदायस्य प्राबल्यमासीत्। अस्य सम्प्रदायस्य प्रवर्तकः प्रचारकश्च 'अग्रदासः' कथ्यते, यः स्वसम्प्रदाये 'अग्रअली' इति नाम्ना संस्मर्यते। एतत्संप्रदायाऽनुयायिनः भक्तगणाः कृष्णचन्द्रस्य रासलीलामिव रामचन्द्रस्य रासलीलामभिनयन्ति स्म। तद्वदद्याऽपि साकेते एतत् संप्रदायमन्दिरेषु सम्प्रदायाऽनुयायिनो भक्ता रासलीलां कुर्वन्तीति श्रूयते। तदानीं सर्वसाधारणजनस्य प्रवेशो निषिद्धः। अयोध्यानगरे विशेषरूपेण पल्लवितस्याऽस्य सम्प्रदायस्य प्रभावः कदाचन विश्वेश्वरनगर्यां काश्यामपि व्याप्त आसीत्। निश्चप्रचमनेन सम्प्रदायेन प्रभावितः शिवभक्तः श्रीजयनारायणघोषालमहोदयः जगतः मातापित्रोः पार्वतीपरमेश्वरयोः ताण्डवनृत्यस्य वर्णनन्न विधाय अस्य काव्यस्य द्वादशपटले शिवस्य शिवायाश्च रोचकं रासवर्णनं विहितवान्।

प्रस्तुतकृतेः विशृङ्खलितपाण्डुलिपिप्रदातारं जयनारायण इण्टरकालेजस्य पूर्वसंस्कृताध्यापकं संस्कृतभाषाप्रचारप्रसारयोर्दत्तक्षणं संस्कृतगाण्डीवपत्रस्य जन्मदातारं मदीयमित्रवर्यं संस्कृतसाहित्यस्य प्रकाण्डपाण्डित्यमण्डितं पण्डितं स्वर्गीय श्रीरामबालकशास्त्रिमहाभागं स्मारं स्मारन्नितरां चेखिद्यते साम्प्रतम् चेतः। यतो हि तदीयजीवनकाले विविधकार्यकलापेषु व्यापृतत्त्वाद् पाण्डुलिपेरस्त-

व्यस्तत्वात् स्वभावसुलभाऽऽलस्यवशात् साम्प्रतमपि उच्चरक्तचापपीड़ितत्वादस्य काव्यस्य गम्भीरचिन्तनं गहनाध्ययनचितं भूमिकालेखन्न कृतम् । अस्मात् कारणादन्यमनस्कतयेयं भूमिका लिखिता कृतिरपि संपादिता च । अतो भूमिकालेखने कृतिसंपादनेऽपि त्रुटिः स्वाभाविकी सा सहृदयैः विद्वद्वर्यैः क्षन्तव्या ।

प्रस्तुतकृतिकारश्रीजयनारायणघोषालमहोदयस्य सम्बन्धे यथावत्प्रामाणिकसूचनाप्रदातृभ्यो डॉ० रामशङ्करभट्टाचार्येभ्यस्तथासम्पूर्णानन्दसंस्कृतविश्वविद्यालयपुस्तकालयस्य पुस्तकाध्यक्षपण्डितलक्ष्मीनारायणतिवारीमहोदयेभ्योऽनेकान् धन्यवादान् वितीर्यान्ते पण्डितप्रवरश्रीतारिणीशझापण्डितशेषधरद्विवेदिमहाभागौ प्रति कार्तज्ञयप्रकाशनमावश्यकं मन्य इति शम् ।

अनन्तचतुर्दशी, प्रभातशास्त्री
२०४२ वैक्रमाब्दः

विषयानुक्रमः

विषयः	पृष्ठसंख्या
भूमिका	५ से १३
प्रथमपटलः	१
द्वितीयपटलः	६
तृतीयपटलः	९
चतुर्थपटलः	१२
पञ्चमपटलः	१५
षष्ठपटलः	१८
सप्तमपटलः	२१
अष्टमपटलः	२३
नवमपटलः	२६
दशमपटलः	२७
एकादशपटलः	३०
द्वादशपटलः	३३
गीतानामनुक्रमः	
पद्यानामनुक्रमः	
प्रयुक्तरागाणां नामानि	
समागतवृत्तलक्षणानि	

श्रीजयनारायणघोषालप्रणीतम्

पार्वतीगीतम्

०

आनन्दतुन्दिलपुरन्दरमन्दमुक्त-
मन्दारदामविगलन्मकरन्दसिक्तम् ।
वन्दे गिरीन्द्रतनयाचरणारविन्दं,
योगीन्द्रवृन्दहृदयभ्रमरावलीढम् ।। १
क्व त्रिलोकजननीचरित्रकं,
क्वाऽपि मन्दविषया मतिर्मम ।
भूहितो ह्यवचिचीषुरस्म्यहं,
स्वर्गशाखिकुसुमानि पाणिना ।। २
अथवाऽस्मिन् प्रयत्नो मे निष्प्रत्यूहं कलिष्यति ।
जगदम्बाचरित्रं हि प्रत्यूहव्यूहनाशकम् ।। ३

०

'चौतालः भैरवरागः'

दशशतलजलजातनिकेत ! जय जय परमब्रह्मद ! नाथ ! । ध्रुवपदम्
कलिभयमपहर करुणां सुवितर सकलभुवनकृतसेव ! ।
त्वयि मम नतिततिरविरतिरतिगतिहीनगतिद ! गुरुदेव ! ।।१
त्वममरतरुरिति गदित इह, जगति कलयसि याचककामम् ।
विपदमतिशमय मम परिपूरय, हृदभिलषितमविरामम् ।।२
तव करुणालवभवबोधनमव, बाधितविषयविकारम् ।
भवनिगडदलनकारणमतुलनमागमकृतमिति सारम् ।।३
जयनारायण इति भणति, शमनदमनमखिलसुखनिलयम् ।
गुरुपदकमलं रसमयममलं, मधु पीयतां मम हृदयम् ।।४

'मूलताल: भैरवराग:'

लयसमरे तलराशौ रक्षसि मग्नम्,
जगदुपकृतये वेदममग्नम् ।
धूमावति ! मीनशरीरे !,
जय जगदम्ब ! शिवे ! ।।१ ध्रुवपदम्
तव पृष्ठे विपुले सचराचरकीर्णा,
सन्ततमस्ति धरणिरविशीर्णा ।
बगलामुखि ! कमठरूपे !,
जय जगदम्ब ! शिवे ! ।।२
खरनखरं तव करकमलं परमकृशम्,
हिरण्यकशिपुं दारयति भृशम् ।
छिन्नमस्ते ! नृहरितान[1] !,
जय जगदम्ब ! शिवे ! ।।३
करुणारसमपहाय बलिं निजदासम्,
अमरकृते गमयसि कणिवासम् ।
भुवनेश्वरि ! वामनतान !,
जय जगदम्ब ! शिवे ! ।।४
नृपकुलरुधिरजलैर्जगदविदितसीमम्,
शमयति कोपानलमतिभीमम् ।
सुन्दरि ! धृतभार्गवतान !,
जय जगदम्ब ! शिवे ! ।।५
हत्वा दशवदनं युधि तदनयदुःस्थम्,
निखिलं भुवनं जनयसि सुस्थम् ।
तारे ! धृतरामरूपे !,
जय जगदम्ब ! शिवे ! ।।६
वहसि कराम्बुरुहेण हलं शितधारम्,
रिपुगणदेहक्षतविदारम् ।

१. अत्र सर्वत्र 'ताने' इति पाठः साधुः ।

भैरवि ! धृतहलिशरीरे !,
जय जगदम्ब ! शिवे ! ॥७

स्वकथितवेदमहो ! कथयसि विपरीतम्,
त्रिजगज्जनयसि मोहपरीतम् ।
महालक्ष्मि ! विश्वरूपे !,
जय जगदम्ब ! शिवे ! ॥८

समरशिरशि सबलं विनिहंसि च कंसम्,
परमं न (हि) दयसे यदुवंशम् ।
श्यामे ! धृतकृष्णरूपे !,
जय जगदम्ब ! शिवे ! ॥९

हंसि म्लेच्छचयान् विनिधृत्य कृपाणम्,
भूत्वा द्विजतनयो बहुशाणम् ।
दुर्गे ! धृतकल्किशरीरे !,
जय जगदम्ब ! शिवे ! ॥१०

जयनारायणभणितं रमणीयम्,
शृणुत बुधाः ! सुरनरकमनीयम् ।
तारिणि ! धृतदशविधतान !,
जय जगदम्ब ! शिवे ! ॥११

वेदोद्धारं धरित्री धरणमसुरहृद्दारणं नागलोके,
सम्प्रस्थायं बलेश्च क्षितिपतिविजयं निर्जयं रावणस्य ।
आदानं व्याच्छलस्य ? श्रुतिपथसमुपालम्भनं कंसनाशं,
म्लेच्छोद्ग्रासं क्रमाद् या रहसि कृतवती तां नमाम्याद्यशक्तिम् ॥४

०

'मूलतालःललितरागः'

जय जय सुरार्च्चिते ! । ध्रुवपदम्
भवभयभञ्जनजनहृद्रञ्जनमञ्जुलचरणसरोजे ! ।
नखरसुधाकरकरपरिवारितमायातिमिरसमाजे ! ॥१

त्रिभुवनभवनविपालनविलयनलीलाकारणभूते ! ।
कृतनिजचारणदुःखनिवारिणि ! करुणानिकरपरीते ! ।।२
मृगपतिवाहिनि ! मुक्तिविधायिनि ! निर्गुणसगुणकशीले ! ।
असुरविदारिणि ! सुरकुलपालिनि ! विरचितबहुभवलीले ! ।।३
कथयति सेवकजयनारायण इह भवसागरभीतः ।
कृपया मामभितारय तारिणि ! भजनरहितमिति मातः ! ।।४

०

प्रातः प्रेमभरालसा निजसखीमालासमेता किल,
मेना भूधरराजधर्मगृहिणी निद्रावतीं पार्वतीम् ।
लीलादेहविधारिणीं भगवतीं ज्योतिर्मयीं चिन्मयीं,
संप्राबोधयताऽमिताक्षरयुतैर्वाक्यैर्जगन्मङ्गलैः ।।५

'मध्यमानतालः विभासरागः'

शशधरवदने ! खञ्जननयने ! परिहर शयनमिदानीम् । ध्रुवपदम्

तव पदपल्लवनखरतुलनमिव नैव समेत्यकलङ्की ।
जलधिपयसि परिमज्जति शीतकरः परिभवशक्तिः ।।१
किसलयलोहितविमलचरणतलतुलनामाप्तुमिवैषः ।
दिवसमुखे तपनं तव परममधिगच्छति विद्रुमभासः ।।२
मृदुपवनावलिकम्पितचम्पकमालाहिमकणभारम् ।
तव चरणाङ्गुलिगमिततिरस्कृतिरिव सृजतीक्षणनीरम् ।।३
कूजति कोकिलकुलमतिमञ्जुलमधिविपिनं वनदेवैः ।
वच इव तव पयबोधजनक्रमभियुक्तं मधुरविरावैः ।।४
भवनवहिः परितिष्ठति वत्से ! तुल्यवयः पुरबालम् ।
तव रचिताञ्जलिखेलनमिच्छत्युपहृतपुष्करमालम् ।।५
श्री जयनारायणभणिताखिलमेनावचनमुदारम् ।
परिकलयत इह दुर्गा निदिशतु दुर्गभवार्णवपारम् ।।६

●

इत्याकर्ण्य गिरं प्रबोधजननीं मायाजनन्याः शुभां,
विश्वेषां जननी मुखाब्जरुचिभिर्विद्योतयन्ती दिशः ।
ईषत्काम्यवती सती त्रिजगतीचैतन्यरूपा मुहुः,
स्मृत्वेशं शयनात् समुत्थितवती पायाज्जगत्पार्वती ॥६

०

इति श्रीपार्वतीगीते
गोत्रोत्थानं नाम
प्रथमपटलः ।१

०

अथ द्वितीयपटलः

०

ततः समाहृत्य शुभात्मकानि,
द्रव्याणि रत्नासनसंस्थितां ताम् ।
पुराङ्गनाभिःसह शैलजाया,
निर्मज्जयामास यथाऽभिलाषम् ॥७

पद्मालया किञ्च पुलोमजेयं,
श्रेयः स्तुतिः किञ्च हिमालयस्य ।
शरीरिणीं तामवलोक्य सर्वा,
नगादिनो विस्मयमापुरीषत् ॥८

नेत्राम्बुभिस्तत्पुरसुन्दरीणां,
चितं तदंनं (तदङ्गं ?) क्रमशः पतद्भिः ।
आक्षेपसूत्रेण विनाऽपि माला-
मिन्दीवराणां रचितां विभर्ति ॥९

मुक्त्वा हि विद्वेषि सुधाकरस्य,
सरोरुहं काव्यविदो वदन्ति ।
मुखेन्दुमालोकयतां हि तस्या
जहुर्दृगङ्गानि निमीलनानि ॥१०

यस्या वैभवलेशमात्रकथने वेदाः परं कुण्ठिता,
ब्रह्माद्या यदनुग्रहप्रणयिनो दौवारिकत्वं गताः ।
पित्रोः प्राज्यमुपार्जितोग्रतपना पूर्णं विधातुं फलं,
भक्ताधीनतया तया बहुविधा लीलास्ततश्चक्रिरे ॥११

०

'मध्यमानताल: रामकेलिराग:'

हिमगिरिराजसुता ललिता नृत्यति नववनितालियुता। ध्रुवपदम्
मत्तकरीन्द्रसुमन्दगता दरदोलितसुन्दरवासाः।
गायति चामितकण्ठगुणं पिककण्ठविकुण्ठनभाषा ॥१
चञ्चलनूपुरमञ्जुलशिञ्जितगञ्जितहंससमाजा।
अञ्जनगञ्जनखञ्जनगर्वविखर्वणनयनसरोजा ॥२
मन्दगलच्छ्रमवारिलवादरविलुलितललितशरीरा।
प्रातरिवानिलकम्पितकल्पलतापरिगलिततुषारा ॥३
चारुसखीगणमध्यगता रुचिरोचितभुवनविताना।
तारापटलविमण्डलिता शशिलेखा हर्षविधाना ॥४
वादयते मृदुवेणुवरञ्जननीविनिहितनवनीतम्।
अत्ति ददाति सखीवदनाब्जे चार्द्धमधुररसपूतम् ॥५
वर्णितमेतदुमाचरितं ललितं सततं परिपूतम्।
श्रीजयनारायणकविना कुरुतामति जगतामतिशातम् ॥६

०

तां दृष्ट्वा हृष्टचेता हिमगिरिवनिता जन्मजन्मार्जितानां,
पुण्यानां पूर्णमाप्तं फलमिव सहसा नेत्रधारां वहन्तीम्।
नृत्यन्तीं प्राङ्गणान्ते बहुस्मितरुचिरां पद्मजाद्यै रवेद्यां,
प्रोच्चैः प्रोवाच वाचो चलकुलतिलकं पूर्णकामा हिमाद्रिम् ॥१२

'होटचौताल: खट (षड्) राग:'

पश्य ममाङ्गनमुमया शोभितमचल! विचित्रमिदम्। ध्रुवपदम्
ताण्डवलोलसुलोहितकिरणपदाम्बुजविरचितभूषम्।
उदयशिखरितटमिव नवसमुदितदिनपतिविततविलासम् ॥१
चारुचरणविनिवेशनलाञ्छनलाञ्छितमध्यविभागम्।
अविरलविकसितनिर्मलशतदलचितमिव शरदि तडागम् ॥२
काञ्चनपीतमयूखविकाशिततनुलतया समुपेतम्।
अम्बरमिव रुचिरं परिखेलितसुस्थिरचपलाजातम् ॥३

स्फुरदभिराममरीचिचयाननमण्डलया कृतचारम् ।
शशधरलेखावयवदिवाऽपि मनोहरविहितविहारम् ।।४
श्रीजयनारायण कविना परिवर्णितमेतदुदारम् ।
सततं श्रवणपुटेन निपीतं सुखयतु कोविदवारम् ।।५

०

संसारार्णवपारसेतुरखिलानन्दैककेलिस्थली,
खेदच्छेदिसमस्ततीर्थनिलयो मोक्षस्य मुख्यायनम् ।
सर्वाभीष्टफलैकसंवितरणश्रीकल्पभूमीरुहः ,
श्रीदुर्गाचरणारविन्दमखिलं पायात् जगत्सन्ततम् ।।१३

०

इति श्रीपार्वतीगीते
बाल्यलीलावर्णनं नाम
द्वितीयपटलः ।२

०

अथ तृतीयपटलः

०

विलोक्य तस्या भुवनाद्भुतानि,
मुदान्वितो बाल्यविचेष्टितानि ।
अनाप्तवल्लोचनयुग्मतृप्तिं,
जगाद मेनामथ शैलराजः ।।१४

०

'मध्यमानतालः श्रीरागः'

अयि कृतसुकृतचये ! गौरीं पुनरपि ।
नर्त्तय सफलय मम नयने ।। ध्रुवपदम्
वादयामि मृदुमधुरमृदङ्गम् ।
त्वमपि कलय करतालविभङ्गम् ।।१
जन्मसु बहुषु तपः कति तप्तम्
मया फलमिदमभिप्राप्तम् ।।२
कोटिकोटिकुलमजनि पवित्रम् ।
कामदुघं मम सबलचरित्रम् ।।३
तोषितविप्रगणाशीर्गदितम् ।
नूनमिदानीं तन्मम फलितम् ।।४
धरणितले न कृतं कति सुकृतम् ।
चरणस्पर्शनसुखमनुभूतम् ।।५
श्री जयनारायण कृतगीतम् ।
भक्तजनं कुरुतामतिप्रीतम् ।।६

०

इति जनकजनन्योर्वाञ्छितं पूरयन्ती,
मदनमथनजाया माायया मोहयन्ती ।
त्रिभुवनमनिशं सा दोहिनी ब्रह्मरूपा,
हिमवति कति कालान् पर्वते संनिनाय ॥१५
तस्याः समीपे किल नारदोऽथ,
वाराणसीनाथनिदेशवर्ती ।
अभ्याययौ प्रीतमना महर्षि—
र्गायंस्तदीयं चरितं महत्या ॥१६
'कृताञ्जलिर्भक्तिनतोत्तमाङ्गः,
स बाष्पधारापरिवाहिनेत्रः ।
तुष्टाव तां हृष्टमना गविष्ठं,
स्पष्टार्थवाग्भिर्वदतां वरिष्ठं ॥१७

०

'चौतालः आशातुयारीरागः'

तव चरणशरणविभवे !। **ध्रुवपदम्**
अव्ययमेकमनन्तविभवमपि परमं ज्योतिरसि त्वम् ।
स्फटिकमणेरिव गुणसंयोगात् तव जगदम्ब ! बहुत्वम् ॥१
त्वं प्रकृतिः पुरुषोऽसि च काले सृजसि रक्षसि संहरसि ।
विश्वमशेषमनिशमभिभजतां मुक्तिपदं विदधासि ॥२
विधिहरिगिरिशमुखा विबुधास्तव जातास्तनुरुहकूपात् ।
क्रमश इमे त्रिजगन्मयरूपे ! दीपालय इव दीपात् ॥३
सुकृतवतां सुकृतं जननी त्वं, यागवतामसि यागः ।
तत्त्ववतामसि परमं तत्त्वं, रागवतामसि रागः ॥४
ध्यायति सकृदपि हृदि यस्तव पदपल्लवमविदितसीमम् ।
गोष्पदमिव भवसागरमाशु स तारिणि ! संतरतीमम् ॥५
तव नाम सुधां निपीयति यः सकृदपि त्रिभुवनमातः ! ।
स पुनर्न च जननीजठरोद्भवदुःखचयाननुयातः ॥६

श्रीजयनारायण कविवर्णितमेतदतीवविचित्रम् ।
शृणुत बुधा ! यदि वो गिरिजाया नन्दयते सुचरित्रम् ॥७

०

तस्याकलय्य वचनं मुनिपुङ्गवस्य,
भक्तिप्रयुक्तमथ भक्तजनानुरक्ता।
साऽऽविर्बभूव पुरतश्च शुभप्रसङ्गै-
रानुग्रहीतुमखिलान्तरभावविज्ञा ॥१८
साष्टाङ्गपातं प्रणिपत्य पत्यु-
रादिष्टमाचष्ट च सन्निकृष्टम् ।
प्रस्थातुमस्यै स तथेति साऽपि,
स्वीकृत्य तत्तत्र तिरोबभूव ॥१९
या ब्रह्माण्डमशेषमीश्वरहृषीकेशप्रजेशादिकान्,
प्रासूय क्रमशो नियोजितवती स्वस्वाधिकारेऽनिशम् ।
सा दुर्गाऽखिललोकदुर्गतिहरा स्वर्गापवर्गप्रदा,
नित्या नित्यमनित्यवैभवभवाद्युष्मन्मनः कर्षतु ॥२०

०

इति श्रीपार्वतीगीते
नारदसमागमो नाम
तृतीयपटलः ।३

०

अथ चतुर्थपटलः

०

भर्तुर्निदेशात् कृतनिश्चयां तां,
वाराणसीं गन्तुमथाद्रिजाया ।
वाष्पप्ररोहावलिरुद्धकण्ठा,
प्रोवाच चेष्टाभवलोलनेत्रा ।।२१

'रूपकतालः तुडीरागः'

अयि वत्से ! जीवामि कथं तव विरहे । ध्रुवपदम्
वचननिमीलनजनितं विरहं ।
नैव पुरा तव सुमुखि ! सहेऽहम् ।।१
मुखशशिसृतममृतं मातेति ।
क्व नु मे श्रवणचकोरी पिबति ।।२
तव वदनाम्बुजमधुवलदङ्गः ।
जीवति किं मम लोचनभृङ्गः ।।३
कैरपराधैर्मामतिदीनाम्
जननि ! परिहरसि श्रवणविहीनाम् ।।४
तव विरहानलविकलितपौराः ।
सम्प्रति मुक्तभवनपरिचाराः ।।५
कलयति हंसकुलं विसकवलम् ।
न च शिखिकुलमपि नृत्यति विकलम् ।।६
शिशुकुलमधुना, मातुरुरोजम् ।
पिबति न मलिनितवदनसरोजम् ।।७
कोऽपि न सहजविषयमाचरति ।
चित्रितमिव पुरमिदमाभाति ।।८

श्री जयनारायणकविभणिति-।
बुधहृदि विहरतु मृदुपदविततिः ।।८

०

वरमहो ! विरहाग्निरहर्निशम्,
दहतु शैलसुते ! त्वदृते भृशम् ।
इदमसह्यमतीव च कोऽपि मां,
न हि जगज्जननीजननीं वदेत् ।।२२

बहुजन्मार्जितैः पुण्यपण्यैः क्रीतमिदं धनम् ।
दुर्वारकर्मचौरेण हा ! हन्ताऽपहृतं क्षणात् ।।२३

शैलाङ्गनामित्यनुशोचमानाम्,
विवेकहीनां प्रसमीक्ष्य दीनाम् ।
विघ्नेशमाता करुणार्द्रचेताः,
प्रशान्तयामास सुशान्तवादैः ।।२४

'तेयोटतालः काफिरागः'

जननि ! विचिन्तय तत्त्वं भावय भावमनित्यम् । ध्रुवपदम्

तनयविभवादिविषयं नियतनश्वरम् ।
विद्धि जलफेनमिव भज सततमीश्वरम् ।।१
विश्वमतिमोहदमेति मम मायया ।
मां स्मरत्विह तु हृदि शान्तिमेति किं तया ।।२
यावदुदयति न हृदि तत्त्वमयभास्वरः
तावदभिभवति जगदविद्याऽन्धकारः ।।३
अम्ब ! मयि भक्तिकरवालखरधारया ।
छिन्धि ममताविषमनिगडमतिहेलया ।।४
आत्मनि निवर्त्तय च चित्तमतिभास्वरे ।
मज्ज सततं परमनित्यसुखसागरे ।।५
शिष्टगणमानससुतोषमशेषेण ।
भणितमिदमावहतु जयनारायणेन ।।६

०

इत्थं मनः पर्वतराजपत्न्या,
निर्जित्य मायामंलमत्स्यभावम् ।
शान्तोपदेशेन समापदस्या—
श्चन्द्रोदयेनेव नभस्तमिस्रम् ।।२५

स्वान्ते सन्ततमस्तु वः समुदितं बालारुणश्रीयुतं,
देव्या भव्यपदं पदं तदमलं विभ्राजमानं परम् ।
यन्मुक्ताफलजालनिर्मलतरे वक्षःस्थले शूलिनः,
शोणाङ्का समलज्जयद्विकसितंक्षीरोदनीरोदरे ।।२६

०

इति श्रीपार्वतीगीते
मेनाविलापो नाम
चतुर्थपटलः । ४

०

अथ पञ्चमपटलः

०

अत्रान्तरे निजकुलाचरणैकविज्ञाः,
प्रेमातिरेकपुलकाञ्चितचारुगात्राः ।
तां तत्र पौरवनिता अभितः समेता,
नानाविधं शुभसमाचरणं प्रचक्रुः ॥२७

०

'हेटाचौतालः पूरवीरागः'

काऽपि युवतिवरा ।
शिव शिव शिव इति गानपरा ॥ ध्रुवपदम्
शंखनिनदपरिपूरितगगना ।
मुहुरभिनर्तितनवशिखिनटना ॥१
विकिरति काऽपि च मङ्गललाजान् ।
नवलतिकेव सुकुसुमसभाजान् ॥२
काऽपि च धेनुगणानपसव्ये ।
न्यस्यति पूर्णकलशमपि सव्ये ॥३
काऽपि च विप्रपदाम्बुजरजसा,
विकिरति मन्त्रं तस्याः सहसा ॥४
तामभिषिञ्चति काऽपि च सलिलैः ।
तीर्थभवैरतिशीतलविमलैः ॥५
नीलनिचोललता वासयते ।
घनवलयिततडितं ह्लेषयते ॥६
शशधरधरसुरजनिर्माल्यम् ।
तस्याः शिरसि दधाति च माल्यम् ॥७

श्री जयनाराणभणितानि ।
दधतु त्रिभुवनतोषमिमानि ।।८

०

अतः परं दुष्करमम्बुजाक्ष्या,
मयैव वै पथ्यविधानमस्याः ।
इतीव चित्ते विनिधाय राज्ञो,
यथेप्सितं सा विदधे ततस्तत् ।।२८

०

'मूलतालिःगौरीरागः'

कुरुते हिमगिरिवनिता सुतां, विविधभूषणभूषिताम् ।ध्रुवपदम्
जितनवतपने मृदुतरचरणे तलरुचिचयनिर्जितम् ।
गतमिव शरणं यावकभरणं रचयति लघुराजितम् ।।१
सुविमलसुघने वितुलनजघने सारसनमतिपीने ।
स्मरति सुमनसो विकिरति बहुशो दृढगुणमिव बन्धने ।।२
विशदमुदारं वक्षसि हारं घटयति कनकामले ।
निन्दिततारं गङ्गासारं परमिव विबुधाचले ।।३
रक्तकरतलं मृदुभुजयुगलं ततमरकतकङ्कणम् ।
जलदवलयितं दिनकृतमुदितं रचयत इव नूतनम् ।।४
स्फुरति विशाले विलिखति भाले सुरुचिररुचिशोभने ।
सुललिततिलकं मृगमदकृतकं मृगमिव मृगलाञ्छने ।।५
जितघनमाले कुन्तलजाले विकलितमृगचामरे ।
विकिरति विमलां चम्पकमालां तडितमिव घनोदरे ।।६
इदमतिरुचिरं कथयति सुचिरं कुरु पदयुगचारणे ।
करुणां तारिणि ! विपदभिवारिणि ! कविजयनारायणे ।।७

०

वत्से ! भर्तृकृतं कुलप्रददया स्यादप्रियं वा प्रियं,
श्रेयः सम्मतया सुमर्षणमविस्मर्त्तव्यमेतच्चिरम् ।

भर्त्तारं वशमानयामरवरं गङ्गाधरं सादरं,
मेनेत्युक्तवती विहाय तनयां मेने हृतं जीवितम् ॥२९

नित्या सर्वगता द्वितीयरहिताऽप्याकारसावर्जिता,
सावित्रीति रमेति कल्पिततनू राधेति वाणीति च ॥
माता चेति गणेशितुः श्रुतिचयैर्या स्तूयतेऽनेकधा,
तां सृष्टिस्थितिसंहृतिप्रणयिनीं दुर्गां भजध्वं जनाः ॥३०

०

इति श्रीपार्वतीगीते
काशीप्रस्थानं नाम
पञ्चमपटलः ।५

०

अथ षष्ठपटलः

०

ततो मृगेन्द्रं विजयाजयाभ्या-
मारुह्य काशीनगरीमुदारम् ।
उपागमत् सान्ततवर्त्मखेदा,
गङ्गाम्बुजारण्यजमन्दवातैः ॥३१

०

तोयाटताल: वसन्तराग:

परमुन्मदमिथुनकपालम् ।
विलसति विरहितजनकृततापं
मधुसमये हरनगरवनम् । ध्रुवपदम्
भ्रमरकदम्बविचुम्बितमल्लीवल्लीरचितनिकुञ्जम् ।
रमणीमण्डलमानविखण्डनपण्डितपरभृतगुञ्जम् ॥१
मनसिजनृपतिच्छत्रसदृशनवविकसितसितशतपत्रम् ।
सुमधुरनिनदपतगवरमागधविपठितमदनचरित्रम् ॥२
मारुतचालितचामररुचिरशिरीषकुसुमसुविकाशम् ।
चित्रितविमलध्वजरवसुन्दरकेशरनिकरविलासम् ॥३
शरदुपशीलनशीतपवनदरकम्पितविकसितबकुलम् ।
युवजनभेदनलोहितप्रक्षितशरनिभकिंशुकमुकुलम् ॥४
पुष्पितसुललितनवमल्लीपरिरम्भिततरुणतमालम् ।
स्तबकपयोधरनम्रमनोहरनवकाशोकसुमालम् ॥५
कुड्मलपुलकितचूतविलोकनमाधविकाकृतहासम् ।
पथिकहृदयतटपाटनपटुतरकेतकगणकर्णाशम् ॥६
अभिहितमेतज्जयनारायणकविना परमरहस्यम् ।
कुरुतां मुदितं परमविरामं बुधगणहृदयमवश्यम् ॥७

०

तास्ता दृष्ट्वा दुरापादमरपुरतो दुर्लभतरे,
पुरे वाराणस्यामुपवनगतं मन्मथरिपुम् ।
उवाचेदं काऽपि प्रियतमसखी शैलतनयां,
स्मितज्योत्स्नाजालस्नपितविलसद्दन्तवसना ॥३२

०

'खवेराबादी ईमनराग:'

शिवे ! रम्यरूपे ! रूपय पुरान्तकमुदारम् ।
तव विरहसम्भरं सखि ! नयनकैतवं दधतमिव दहनमनिवारम् ॥ध्रुवपदम्

इह सततमन्तसमये निखिलदेहिनां श्रवणपुटकेषु भवतारम् ।
नाम तव तत्त्वमयमादधतमुत्तमं विकसदभिनवपुलकभारम् ॥१
तव वदनरुचिररुचिनिचयपरिचोरकं चन्द्रमपि तापसुनिदानम् ।
धरणिधरकुलतिलकपुत्रि ! विनिबिभ्रत स्वीयशिरसि च निरवसानम् ॥२
श्रवणतटसीमसञ्चारिचललोचने ! लोचयितुमिव नयनसाम्यम् ।
तवविमलपाणिकमले च मृगशावकं सम्प्रति वहन्तमतिकाम्यम ॥३
सजलघनकिरणचयनिन्दिनववेषिकाभ्रमत इव ते सदनुरागम् ।
स्वहृदि भृशविस्तृते मणिनिकरकोचिते दधानमयि ! वासुकिनागम् ॥४
त्वामृते विकलमिदमामनति काशीनगरममरसुदुरापम् ।
त्वमिममधुनाऽर्हसि स्वजनमनुरागिणं कर्तुमनुकपरितापम् ॥५
इदमचलराजतनयाऽलिजनभावितं भक्तजनमानसविहारम् ।
शृणुत जयपूर्वनारायणविर्वाणितं सन्त इह दोषपरिहारम् ॥६

०

सम्फुल्लचम्पकदलामलगौरगात्री ,
कुन्दालिनिन्दिरुचिना गिरिशेन पौरी ।
रेजे ततः समुपगत्य तदासनार्द्धं,
वर्षात्यये जलधरेण तडिल्लतेव ॥३३

अन्योन्यप्रतिविम्बितं सुविमलान्योन्यासनासीनयो-
र्यत्सम्मार्जितरत्ननिर्मितभवादेशाभिरामच्छवि ।
पित्रोर्विश्वजनस्य रूपमनघं गाढानुरागात् स्फुटा--
मन्योन्यान्तरगामितामिव सदा कुर्वञ्जगत् पातु तत् ।।३४

०

इति श्रीपार्वतीगीते
वसन्तवर्णनं नाम
षष्ठपटलः ।६

०

अथ सप्तमपटलः

०

अथ सान्द्रतरानन्दसमुज्झिततनूरुहः ।
जगाद पार्वतीं शम्भुः प्रेम्णा मधुरया गिरा ॥ ३५

मूलतानः कानोडारागः

विमले मम देहे जीवनमधुना जातम् । ध्रुवपदम्
सन्निधिमेत्य तवाऽहं गुणमयि ! सकलं कर्म चरामि ।
प्राणमयि ! त्वद्विरहित इव मृतवद्गहनमपि न भजामि ॥१
श्रुतिरसि मतिर्दृष्टिरसि त्वं प्रेयसि ! मम रसनाऽसि ।
पुष्टिस्तुष्टिरथापि भूषा स्मृतिरसि गन्धवहाऽसि ॥२
विकलितसुरकुलविषमगरलचयपाने या तु भवानि ! ।
मम जगतीजनमोहननिपुणा शक्तिः सा त्वममानि ॥३
तव विरहजनितमतुलं सुन्दरि ! दुःखं यदनुभवामि ।
सुखमपि दर्शनजं तत् किञ्चन पञ्चमुखः कथयामि ॥४
काशी धन्या कृतकतिपुण्या त्रिदशनगरसुदुरापम् ।
यदियमुपैति तवातुलपदकमलाङ्कितमपहतपापम् ॥५
श्रीजयनारायणकविकथितं काव्यमिदं तु न कस्य ।
परमां सम्पल्लहरीं चेतसि जनयति जगति जनस्य ॥ ६

०

इति ब्रुवन्तं निजवल्लभं ततः,
समुल्लसत्प्रेमरसार्द्रचेतसम् ।
श्रुतिप्रमोदप्रतिपत्तिपेशला ,
जगाद गौरी मधुराक्षरा गिरः ॥ ३६

तेयोटतालः खामाजरागः

जानीहि मामिदानीमधिगतसकलमनोरथाम् ।[ध्रुवपदम्]
विरहक्लृशां तव मुखशशिदर्शनतोषविफुल्लकलेवराम् ।
जलधरजलधारापल्लवितां लतामिव भगविकलतराम् ॥ १
त्वामधिगम्य परमसुखसागरमग्नां चिरमभियाचितम् ।
दुर्गतिनीमिव निधिचयवर्षणमम्बरतः सहसागतम् ॥ २
जीवननाथ ! विना भवताऽसून् क्षणमपि धर्त्तु मशक्ताम् ।
चन्दनतिलकामितमलयाख्यकगिरिणानन्यसुरक्ताम् ॥ ३
ध्यानवशादधिगम्य भवन्तं कथमपि रक्षितजीवनाम् ।
प्रागिव वर्षासमयाज्जलदं पिपासितचातकाङ्गनाम् ॥ ४
क्षीणतरां त्वामधुनाऽवाप्य प्रतिसमयागतशान्तिम् ।
शशधरलेखामिव तिथिभेदं दधतीमभिनवकान्तिम् ॥ ५
श्रीजयनारायणकविकृतमिति गीतं श्रुतिसुखकारणम् ।
शैलसुताचरणचारणानां निदिशतु भवतो वारणम् ॥ ६

०

देवानां प्रणिपातनम्रशिरसां निर्भीतिसम्भाषणं,
भक्तानाञ्च परेतराजविजयेष्वाज्ञापनं वैरिणाम् ।
स्तम्भक्षोभणमोहनप्रमथने संसिद्धमन्त्रोपमम्,
पायाद्वो युधि वृत्तनृत्यगिरिजामञ्जीरसंशिञ्जितम् ॥ ३७

०

इति श्रीपार्वतीगीते
शिवसम्भाषणं नाम
सप्तमपटलः ।७

०

अथ अष्टमपटलः

०

पत्युः कदाचिदथ सा रहसि स्थितस्य,
सम्प्रार्थितस्य गुरुहर्षसमृद्धचेताः ।
आज्ञामवाप्य किल योगिगणावकीर्ण-
मेकाम्रनामविपिनं तरसा प्रतस्थे ॥ ३८
ततो धृताऽऽभीरसुतासुवेशा,
निजप्रभाजालविकाशिताशा ।
अलञ्चकारेश्वरपालितं तद्,
वनं प्रसूनैः परिपूरितं सा ॥ ३९

तेयोटताल: धानश्रीरागः

०

विहरति विपिनेऽखिलभुवनेशा ।
सा धृतवल्लवतनयावेशा ॥ ध्रुवपदम्
मृदुलसमीरणशीतलसुललितनीपतले कृतचारा ।
शिवगुणकीर्त्तनपरमामोदनविगलितलोचनधारा ॥ १
दोहनपात्रकवेत्रकवेणुविशोभितकरशतपत्रा ।
नीलनवीननिचोलवरा हरिचन्दनचर्चितगात्रा ॥ २
अभिनवकुसुमविनिर्मितमालावलयितकबरीभारा ।
निन्दितमुक्ताफलगणलम्बितमल्ली कुड्मलहारा ॥ ३
अधरितनूतनपदारागरुचिविलसदशोकवतंसा ।
तत्प्रतिबिम्बविजिह्मितचारुद्युतिभरसंवहदंशा ॥ ४
परिणतबिम्बविडम्बितदशनच्छदगतसुविशदहास्या ।
हीरकखचितसुविद्रुमरचितवराटककनकमलास्या ॥ ५

सार्द्रालक्तकसुचरणविहरणसुरुचिरचिह्नचयेन ।
निचितं स्थलमिव तज्जनयन्ती लोहिततामरसेन ॥ ६
अभिनवविसवलयावलिभूषितबाहुयुगामृतभाषा ।
खगपतिचञ्चुकीर्तिनिवर्त्तनचत्वरमनोहरनासा ॥ ७
श्रीजयनारायणकविभाषितमिति नवरूपमुमायाः ।
ध्यायत भक्तजनाः ! सततं हृदि पापचयापहरायाः ॥ ८

०

तत्रोदञ्चन्मृदुमधुरवैर्वारिताशेषविश्व-
स्वान्तस्थैर्य्यं नवनवलसद्रागसार्थं ततः सा ।
पीयूषोद्भावयत उदधेर्मानविम्लानबीजं,
वक्त्राम्भोजे प्रसृतपवनैः पूरयामास वेणुम् ॥ ४०
माधुर्य्यैरवधीरितामृतरसं तं वेणुनादं मुहुः,
श्रुत्वा कर्णयुगं निहन्ति पशवो व्यस्तास्ततो मानवाः ।
धातारं श्रवणद्वयं विदधतं निन्दन्ति वाञ्छन्ति च,
व्यालो नेत्रसहस्रतां च चकमे चक्षुःश्रवस्त्वं वृषाः ॥ ४१
जगन्मातुर्लीलारसभरसमालोलमनसो,
मनोवृत्तिं ज्ञात्वा सुरभिरथ पातालपुरतः ।
पदं द्रष्टुं ध्यातुं विधिहरिहराद्यैः सुरगणै—
रुपागच्छत्तत्र स्वगणनिचयैः सम्परिवृता ॥४२
सा गोपतनयारूपधरां विश्ववनस्थलीम् ।
नत्वा जगाद तामेतत् प्रेम्णोत्फुल्लकलेवरा ॥४३

०

सूरफाकतालः चिडिरागः

शैलसुते ! मम नतिरास्तां तव चरणे ।ध्रुवपदम्
निन्दितनूतनमिहिरविकाशे, भक्तहृदयतटतिमिरविनाशे ।१
किल्विषदहनहुताशनजाते तापविनाशामृतसम्पाते ।२

नतसुरपतिमुकुटासितमणिना, तुलयति कमलं चुम्बितमलिना ।३
वाञ्छाधिकफलविच रणचतुरे, अमरमहीरुहमानं छिदुरे ।४
घोरभवार्णवतारणतरणे, त्रिभुवननिःश्रेयसैकभरणे ।५
विदधति शङ्करवक्षसि परमां, पद्मरागमणिवरयुगसुषमाम् ।६
लोहितभासिनखरवरविचिते, शोणकमल इव हिमकणललिते ।७
जयनारायणभणितं गीतं, सुखयतु जगति श्रवणनिपीतम् ।८

०

घोरान्तः करणाप्रघर्षणतमः स्तोमापसारामल—
वर्त्मा लोकमहौषधं त्रिजगतां पङ्कौघसंशोषणः ।
श्रीदुर्गाचरणारुणः स्फुटजवापुष्पाभिरामद्युति—
र्युष्माकं हृदयाम्बरे समुदितो भूयाद् विपद्वारणः ।।४४

०

इति श्रीपार्वतीगीते
एकान्तवनगमनं नाम
अष्टमपटलः ।८

०

अथ नवमपटलः

०

तत्र सा कति दिनानि लीलया,
धेनुपालनपरायणा सती ।
अध्युवास जगदीश्वरी वने,
सिद्धचारणगणैः समाकुले ॥४५

मध्यमानतालः सारङ्गरागः

सा विपिने शिवजाया ।
धेनुगणान् परिचारयति त्रिभुवनजनमोहनमाया ॥ ध्रुवपदम्
क्षुधितान्नवतृणकवलैरवति पिपासून् शीतजलेन ।
आमन्त्रयति विपथमनुयातान् सुमधुरवेणुरवेण ॥१
वत्सतरप्रतिबिम्बविचिह्नितममलं मृदुलशरीरम् ।
निहिता विनिवारयति करेण रणद्वलयेन गंभीरम् ॥२
सम्मुखगतनिजवत्सतरानपहाय विवृत्य च तुष्ट्या ।
लोकयतो मुहुरास्यविधुं सुखयन्ती सकरुणदृष्ट्या ॥३
मञ्जुलवञ्जुलकिसलयबुद्ध्या कवलयतः पदयुगलम् ।
लालयते निजकरकमलेन च तेषां वपुरतिमृदुलम् ॥४
दोहं दोहं विमलपयांसि च तैस्त्रिपुरान्तकलिङ्गम् ।
अभिषिञ्चति परिफुल्लहृदयनलिना भुवनेश्वरसंज्ञम् ॥५
श्रीजयनारायणभणितैषा गीतिर्भक्तजनानाम् ।
हृदयतटं प्रतिवसतु सदा शिवजायागुणमुदितानाम् ॥६

०

निःसाराच्चपलेन्द्रजालसदृशाद् भूयिष्ठकष्टाकरात्,
संसाराद् विनिवृत्य नृत्यपरमप्रीतिप्रदे सम्पदाम् ।
सर्वासां कुलमन्दिरे त्रिजगतां सारे सुरैर्वाञ्छिते,
भूयाद् वः सुरसुन्दरीपदयुगाम्भोजे मतिर्निर्मला ॥४६

०

इति श्रीपार्वतीगीते
गोष्ठवर्णनं नाम
नवमपटलः ।९

०

अथ दशमपटलः

०

स्नेहेन देहार्द्धहरं हरप्रिया,
हरं समुद्दिश्य विलोलमानसा ।
कामप्यसौ दुःखसुखांशभागिनी-
मथाब्रवीदिन्दुमुखीं सखीमिति ॥४७

खायारावादीतालः हामीररागः

त्रिभुवनहृदयानन्दनिधानं स्मरति सदा मम मन ईशानम् ।ध्रुवपदम्
सकलकलापरिपूर्णसुधाकरदर्पदलनमुखकान्तिम् ।
विकचकमलरुचिलोचनवलनविधूतयुवतिजनशान्तिम् ॥१
अभिनवभवदमृतनिकरमधुरिमगरिमविलोपनभाषम् ।
परिहृततरुणीमानतिमिर (तति) तरुणाधरगतहासम् ॥२
सुविशदपृष्ठतलावबिलम्बिपिशङ्गजटापरिवारम् ।
स्फटिकशिलोच्चयतटमिव कूटाद् विगलितधातुजधारम् ॥३
अवधीरितकरिवरकरजानुविलम्बिललितभुजदण्डम् ।
दशनवसनपरिलसदतिशोणिमनिन्दितविद्रुमखण्डम् ॥४
अमलस्थलकमलद्युतिचयविनिगञ्जनचरणविकाशम् ।
सुरतटिनीसलिलोर्म्मिपटलनिभसुवलीत्रितयविलासम् ॥५
ददतं विततललाटतटोपरि शिशिरकरं समुदारम् ।
विजयकलितमिव रतिपतिसायकमर्द्धशशाङ्काकारम् ॥६
भणितमिदं जयनारायणकविना परमेश्वरम् ।
गिरितनयोदितमादिशतु शुभं भक्तिमतामनुरूपम् ॥७

०

बाणानपाङ्गलसितानि शरासनञ्च,
भ्रूयुग्मकं श्रवणपालिमथास्य मौर्वीम् ।

कामं विजित्य जयसाधनवस्तुजातं,
तस्यैव मन्मथरिपुः स्वयमाप्तहारः ॥४८
प्रौढाङ्गनामृदुलकाङ्गमपाङ्गवह्नि-
र्भस्मीकरोति सखि ! कामरिपोर्न चित्रम् ।
भस्मीकृतं कुलवधूवधकण्ड्वनङ्ग-
मङ्गीकरोति पुनरेव ममेति चित्रम् ॥४९
त्वया हि काशीनगरीनिवासिनं,
समानय क्षिप्रमिहेन्दुशेखरम् ।
इति प्रयुक्ता गिरिजातया तया,
सखी समेत्य त्रिपुरारिमब्रवीत् ॥५०

०

मध्यमानतालः इमनरागः

शङ्करी शङ्कर ! तव विरहे । ध्रुवपदम्
शिव शिव इति तव नाम सकामम् ।
जपति यथेच्छफलदमविरामम् ॥१
दिक्षु विदिक्षु विलक्षणरूपम् ।
(वि) लक्षति त्वां जीवनभूपम् ॥२
स्रस्तं स्रस्तं विषक्तविलयम् ।
धवति सखी लंघितनिजनिलयम् ॥३
क्वानुभवामि भवं भवसारम् ।
इति पृच्छति परिजनमनुवारम् ॥४
विलिखति धरणीं नतमुखकमला ।
श्वसितमननमिव विसृजति विकला ॥५
विरुवति परभृतयूथे विकलम् ।
स्वम् पिदधाति श्रुतिपुटयुगलम् ॥६
निन्दति मञ्जुलवञ्जुलकुञ्जम् ।
कलयति मलयजमिव विषपुञ्जम् ॥७

श्रीजयनारायण कविभणितम् ।
जगतामपहरतु सकलदुरितम् ॥८

०

पीयूषद्युतिरप्यहो ! विसृजति क्षामोच्चयं रश्मिभिः,
प्राणानत्तुमिव प्रसर्पति जगत्प्राणोऽप्यसौ सम्प्रति ।
तस्या वाडवहेतिकं वितनुते दुर्धर्षणीयं हिमं,
नास्त्यन्यो भवता विना स्मररिपो ! प्राणप्रदानप्रभुः ॥५१
ज्ञानानन्दनरूपिका शिवमनःसन्तोषिका शोषिका,
पापानामथ पोषिका त्रिजगतामुत्पादिका हारिका ।
भक्ते मुक्तिविधायिका रिपुकुलप्रोन्माथिका दीपिका,
या मोहप्रबलान्धकारहरणे सा पातु वश्चण्डिका ॥५२

०

इति श्रीपार्वतीगीते,
विरहवर्णनं नाम,
दशमपटलः ।१०

०

अथ एकादशपटलः

०

लीलारसोल्लासितमानसायाः,
प्राणप्रियाया अथ विश्वनाथः ।
सखीजनस्याहृतमर्थविज्ञः,
श्रुत्वा द्रुतं तद्विपिनं जगाम ।।५३
निवसामि निकुञ्जेऽस्मिन् समानय मम प्रियाम् ।
इत्युक्ता सा शिवेनाथ गौरीमेत्याब्रवीदिदम् ।।५४

०

मध्यमानतालः आडानारागः

सीदति विरही कुञ्जे सखि! शशिमौलिः । ध्रुवपदम्
वाति मलयजपवने प्रेमभरालसः ।
ध्यायति तव गमनं विकलितमानसः ।।१
उदयति शिशिरकिरणे तापभरमेति ।
विकसति कुसुमचये स्मरशरतो बिभेति ।।२
नदति कोकिलकुले हृदि शल्यमुपैति ।
सुविनदहंसकुलं यमचारमवैति ।।३
स्वपिति धरणीतले निन्दति कुसुमदाम ।
हृदये विरहविधुरे प्रलपति तव नाम ।।४
दिशतु करुणामुमा निजपदचरणे ।
कथयति गीतमिदं जयनारायणे ।।५

०

नान्यद् ध्यायति संशृणोति वदति प्रत्येति पश्यत्यपि,
त्वद्विच्छेदनखेदकुण्ठकरणग्रामः सदा शङ्करः ।

मन्ये कुञ्जगृहोदरे सखि ! जपंस्त्वन्नामतत्त्वं मनुं,
सर्वाभीप्सितदं तपः प्रचरति त्वत्प्राप्तिकामोऽनिशम् ॥ ५५

०

तेयोपटतालः विहागडारागः

विकसितकुसुमे राजति विपिने चिन्तितमुखभुवनेशः । ध्रुवपदम्
मृदुलसमीरे कुञ्जकुटीरे युवतिविमोहनवेशम् ।
अधिगतमिन्दुविमलमुखि ! सत्वरमनुचर तं परमेशम् ॥१
त्वदुपगमनपरमाकुलहृदयो दिशि दिशि विकिरति नेत्रम् ।
दिग्वनिताजनललितवतंसनमिव विकसितशतपत्रम् ॥२
कुञ्जं प्रविशति मुहुरपि विचरति बहिरतिचञ्चलनयनः ।
ध्वनति समदने मधुकरमिथुने शङ्कितनूपुररवणः ॥३
चिरविरहैरतितापितमानसमर्हसि रक्षितुमेतम् ।
सखि ! निजवल्लभमशरणमनुगतमुपसर कुञ्जनिकेतम् ॥४
श्रीजयनारायण इति गीतं भणति सतामभिरामम् ।
हिमगिरितनया दुःखितसदया शमयतु भवमविरामम् ॥५

०

ततः प्रियाप्रेमरसानुरागिणी,
चिरादवालोकनमुग्धलोचना ।
प्रफुल्लपुष्पं भ्रमरालिगुञ्जितं,
जगाम कुञ्जं गजमञ्जुगामिनी ॥५६

०

तोयाटतालः जयजयन्तीरागः

प्रविशति भुवनत्रयजननी सा शिवयुतकुञ्जं प्रेमवशा । ध्रुवपदम्
शिवजय शिवजय भाषणशीला ।
गमनतिरस्कृतकुञ्जरलीला ॥१
निजकरविधृतसखीकरकमला ।
किरणचयैरवधीरितचपला ॥२

मुखशशधरनलिनामृतहासा ।
दलितहराक्षिचकोरपिपासा ।।३
मुखमारुतसुरभितसकलाशा ।
वारितमधुकरकमलप्रिया सा ।।४
जयनारायण इदमभिभणति ।
ताराकरुणाङ्कुरतां नमति ।।५

०

या बुद्धिः प्रतिभा दया हृतभया माया च मेधा सुधा,
तुष्टिः पुष्टिरपि क्षमा च विकृतिः शान्तिश्च कान्तिस्तृषा ।
मुक्तिभुक्तिरथोक्तिराकृतिरपि श्रद्धा च विद्या त्रपा,
निद्रा सर्वशरीरिणामवतु सा विश्वं सदा शङ्करी ।।५७

०

इति श्रीपार्वतीगीते
दूतीसंवादो नाम
एकादशःपटलः ।११

०

अथ द्वादशपटलः

०

अत्रान्तरे तत्र पवित्रवेशा,
शिवेन सार्द्धं गिरिराजपुत्री ।
विश्वत्रयामोदनमादधानां,
प्रकाशयामास च रासलीलाम् ॥५८

०

तेयाटताल: केदारराग:

विराजति रासमण्डले शिवया शिव एकाम्रवने । ध्रुवपदम्
विलुलितवेणी शोभितरत्ना यया जितसुशिखिशिखण्डः ।
तप्तकनकरुचिरोचितया रुचिनिन्दितहीरकखण्डः ॥१
अलकललितमुखमण्डलया मणिकुण्डलमण्डितगण्डः ।
कङ्कणराजितभुजलतया मणिचयराजितभुजदण्डः ॥२
चञ्चलचारुदृगञ्चलया विकचेन्दीवरनेत्रः ।
सुविशदहारविभूषितया वनमालावलयितगात्रः ॥३
नीलनवीनाम्बरधरया नवपीतनिचोलवसानः ।
करतालविलोलकराम्बुजया स्वरपूरितसुललितगानः ॥४
त्रिभुवनपित्रो रूपमिदं सुरनिकरैश्चिरमभिलषितम् ।
श्रीजयनारायणकविना परिचिन्तय हृदये भणितम् ॥५

०

अष्टाभिर्मिथुनैः सुचारुचरितं तत्तत्स्वदेहोद्भवै—
स्तत्तद्रूपमनोहरैरनुपमं श्रीरासमण्डलम् ।
तत्तद्वेशधरौ त्रिलोकपितरौ लीलोल्लसन्मानसौ,
श्रीदुर्गागिरिशौ तदन्तरगतौ संशोभयाञ्चक्रतुः ॥५९
ततो बहुविधे तत्र रासलीलामहोत्सवे ।
पार्वत्या परमप्रीत्या जगदे जगतीश्वरः ॥६०

०

मध्यमानतालः रागपरजः

शशिशेखर ! कुरु कृपया मामभिनिचितां भूषया । ध्रुवपदम्
जगदनुरञ्जनमनुपममलिकं भूषय मृगमदतिलकेन ।
शारदमतिरुचिरं परिमिलितं त्वं शशधरमिव शशकेन ।।१
विरचय गण्डयुगं मम परिहर सुललितमृगमदपत्रकम् ।
उपरि विलसितमधुव्रतनिकरं विकसितमिव शतपत्रकम् ।।२
जनय चिकुरनिचयं कमलेक्षण ! निचितं कुरुबकमालया ।
स्फुरदतिनीलकिरणमिव नीरदमभिनवस्थिरचञ्चलया ।।३
अनुरञ्जय मम जीवननाथ ! विलोचनमञ्जनलेखया ।
कमलोदरपरिखेलितखञ्जनमपलज्जय हेलया ।।४
कटितटमीश ! विधेहि मनोहररसनापरिवलयितम् ।
उरसि समर्पय निर्म्मलहारं कुरु करमपि कटकाञ्चितम् ।।५
वर्णितमिति जयनारायणकविना विदधातु भुवनानाम् ।
कलुषविषमविषनाशनमनिशं कलिविषधरकवलितानाम् ।।६

०

ततो भूधरराजस्य तनयाप्रार्थितो यथा ।
प्रोल्लसत्परमप्रीतिः शङ्करोऽपि तथाऽकरोत् ।।६१
विद्याधरीकिन्नरसुन्दरीणां, गणो गुणग्रामवदग्रगण्यः ।
शुश्रूषया तोषयदाशु तत्र, सुखासनस्थावथ दम्पती तौ ।६२

०

तेयोटतालः खामाजरागः

गायति काचन सुललितगानम् ।
पूरितपञ्चममधुरिमखण्डितपिककुलगानम् ।। ध्रुवपदम्
काऽपि च तावनुचालयते मृदुचामरमतिशयगौरम् ।
आतपवारणमुपरि दधाति च काचन शशिकरचौरम् ।।१
चन्दनकुंकुमपङ्कचयैरनुलिम्पति काऽपि तदङ्गम् ।
उरसि दधाति तयोरथ काऽपि कुसुमगुणमलिकृतसङ्गम् ।।२
वादयते बहुविधमपि वाद्यं काचन कर्णविनोदम् ।
नृत्यति काऽपि च शिल्पविशेषविवर्द्धितमानसमोदम् ।।३

भाषितमिति जयनारायणकविना कलयत शुभगानम् ।
भक्तजनाः सततं कविनरपतिमानसतोषनिदानम् ।।४

०

अत्रान्तरे तद्विपिनप्रवासिनस्तपोधनालोचनवारिवर्षिणः ।
स्वभक्तिभावेन तनूरुहाञ्चिता, बभाषिरे तौ जगदीश्वराविति ।।६३

०

तेयोटतालः मालकोषरागः

तारयतं भवसिन्धोः वारयतं कलिकलुषात् ।
कुरुतं पितरौ कृपया नो विषयरसे विरतान् । ध्रुवपदम्
त्रिभुवनदैन्यविनाशे सततं सकरुणचित्तौ,
मोहमहार्णवपतितान् दीनान् शरणविहीनान् ।
पापवारणवारणे घोराङ्कुशपदकमलौ,
पापिजनाग्रविग्रहान् विपथगकरणाधीनान् ।।१
नानापथविकलानां जगतीनाञ्च भवन्तौ,
सदयनमुपदेष्टारौ श्रुतमिदमागममुक्तम् ।
तत् किं नो दिशतोऽस्मान् प्रति कापथमनुयातान्,
कल्मषकण्टकदलितान् मृषयत इति तदयुक्तम् ।।२
काचन गतिरिह नास्ते मायानिगडविमुक्त्यै,
युवयोः पदशरणमृते निभृतेनिगमोदितमिति तत्त्वम् ।
अस्मान् यदि गतिहीनान् नो कृपयथ इह न तदा,
कैरपि घोषयितव्यं भवतोरगतिगतित्वम् ।।३
कृतगुरुपदयुगनतिना जयनारायणकविना,
कविकुलमुदे सुभणितं गीतं कुरुतां सुमतिम् ।
अचलमहीपतितनयाचरणसरोजं भजतां,
शमयतु भवभयनिचयं सततं हरतु च कुमतिम् ।।४

०

इति स्तुतौ तौ वनचारिभिस्तैर्मनोऽनुकूलं वरमेव दत्त्वा ।
एभ्यो महाविस्मयमागतेभ्यस्तिरोदधाते शुभदौ जगत्याः ।६४

०

आसीद् ब्रह्मकुलोद्भूतः शिरो नाम महामतिः ।
तस्माज्जात उधो धीरस्ततः कोच इति स्मृतः ॥१
तत आभः समाजज्ञे सञ्जातश्च ततो यशः ।
उदयश्च ततो जातस्ततो बाणेश्वरोऽभवत् ॥२
तत्पुत्रो विश्वनाथोऽथ कंसारिस्तत्सुतो महान् ।
कंसारेस्तनयः श्रीमान् श्रीधरः परिकीर्त्तितः ॥३
यदुनाथस्ततो यज्ञे पाठकख्यातिमीयिवान् ।
गोपीकान्तस्तस्य पुत्रो रामकृष्णश्च तत्सुतः ॥४
राजेन्द्रस्तनयस्तस्य विष्णुदेवस्ततोऽभवत् ।
दुलालश्चाऽपि कन्दर्पो विष्णुदेवसुतावुभौ ॥५
कन्दर्पात् कृष्णचन्द्रोऽभूद्, गुणवान् विजितेन्द्रियः
अभवत् कृष्णचन्द्रस्य जयनारायणः स्मृतः ॥६
अजायत सुतस्तस्य कालीशङ्करसंज्ञकः ।
तस्य षट् तनयाः ख्याताः काशीकान्तोऽग्रजो महान् ॥७
सत्यप्रसादस्तदनु तृतीयः सत्यकिङ्करः ।
चतुर्थः सत्यचरणो घोषालः परिकीर्तितः ॥८
पञ्चमः सत्यशरणः षष्ठः सत्यप्रसन्नकः ।
इति षण्णां कुमाराणां सत्यभक्तस्तु सप्तमः ॥९

०

संप्रज्ञाविषयानुरूपरचितं क्षेमङ्करं यन्मया,
सद्भक्ताय जयादिना द्विजनुषा नारायणेनाचिरात् ।
क्रूराकारणदुर्विवादघटनात् पर्यस्यतां पार्वती–
सङ्गीतं तदिदं सतां क्तिनुतां संशृण्वतां श्रीततिम् ॥६५

०

इति श्रीपार्वतीगीते
रासवर्णनं नाम
द्वादशपटलः ।१२

०

गीतानामनुक्रमः

	गीतानि	पृष्ठसंख्या:
अ	अधरितनूतन	२३
	अनुरञ्जय मम	३४
	अभिनवकुसुम	२३
	अभिनवभवदमृत	२७
	अभिनवविसवलया	२४
	अभिहितमेतद्	१८
	अमलस्थलकमल	२७
	अम्ब ! मयि भक्ति	१३
	अयि कृतसुकृत	६
	अयि वत्से ! जीवामि	१२
	अलकललितमुख	३३
	अवधीरितकरि	२७
	अव्ययमेकमनन्त	१०
	आत्मनि निवर्त्तय	१३
इ	इदमचलराज	१९
	इममतिरुचिरम्	१६
	इह सततमन्तसमये	१६
उ	उदयति शिशिर	३०
क	कटितटमीश !	३४
	कथयति सेवक	४
	करुणारसमपहाय	२
	कलयति हंसकुलं	१२
	कलिभयमपहर	१
	काऽपि च तावनुचाल	३४
	काचन गतिरिह	३५
	काऽपि च धेनु	१५
	काऽपि च विप्र	१५
	काऽपि युवतिवरा	१५
	काञ्चनपीतमयूरव	७
	काशी धन्या	२१
	किल्विषदहन	२४
	किसलयलोहित	४
	कुञ्जं प्रविशति	३१
	कुड्मलपुलकित	१८
	कुरुते हिमगिरि	१६
	कूजति कोकिल	४
	कृतगुरुपदयुग	३५
	कैरपराधैर्मम्	१२
	कोटि कोटिकुल	९
	कोऽपि न सहज	१२
	क्वानुभवामि भवं	२८
ख	खरनखरं तव	२
ग	गायति सुललितगानम्	३४
घ	घोरभवार्णव	२५
च	चञ्चलचारु	३३
	चञ्चलनूपुर	७
	चन्दनकुंकुम	३४
	चारुचरणविनि	७
	चारुसखीगण	७
	चिरविरहैरति	३१

	गीतानि	पृष्ठसंख्या:		गीतानि	पृष्ठसंख्या:
ज	जगदनुरञ्जन	३४		त्वं प्रकृतिः पुरुषोऽसि	१०
	जननि ! विचिन्तय	१३		त्वदुपगमन	३१
	जनय चिकुरनिचयं	३४		त्वामधिगम्य	२२
	जन्मसु बहुषु	९		त्वामृते विकल	१९
	जय जय सुरार्चिते	३		त्रिभुवनदैन्यविनाशे	३५
	जयनारायण इदम्	३२		त्रिभुवनपित्रोः	३३
	जयनारायण इति	१		त्रिभुवनभवन	४
	जयनारायणभणितं	२५		त्रिभुवनहृदयानन्द	२७
	जयनारायणभणितं	३	द	ददतं वितलललाट	२७
	जानीहि मामिदानीं	२२		दशशतजलजात	१
	जितघनमाले	१६		दिशतु करुणामुमा	३०
	जितनवतपने	१६		दिक्षु विदिक्षु	२८
	जीवननाथ ! विना	२२		दोहनपात्रक	२३
त	तनयविभवादि	१३		दोंहं दोंहं विमल	२६
	तव करुणालव	१	ध	धरणितले	९
	तव चरणशरण	१०		ध्यानवशादधि	२२
	तव नाम सुधां	१०		ध्यायति सकृदपि	१०
	तव पदपल्लव	४	न	नतसुरपति	२५
	तव पृष्ठे विपुले	२		नदति कोकिलकुले	३०
	तव वदनरुचिर	१९		नानापथविकलानां	३५
	तव वदनाम्बुज	१२		निजकरविधृत	३१
	तव विरहजनित	२१		निन्दति मञ्जुल	२८
	तव विरहानल	१२		निन्दितनूतन	२४
	ताण्डवलोल	७		नौलनवीनाम्बर	३३
	तामभिषिञ्चति	१५		नीलनिचोललता	१५
	तारयतं भवसिधोः	३५		नृपकुलरुधिरजलै	२
	तोषितविप्रगण	९	प	परमुन्मदमिथुन	१८
	त्वममरतरुरिति	१		परिणतबिम्ब	२३

	गीतानि	पृष्ठसंख्याः		गीतानि	पृष्ठसंख्याः
	पश्य ममाङ्गन	७		वर्णितमिति	३४
	पुष्पितसुललित	१८		वहसि कराम्बुरुहेणं	२
	प्रविशति भुवनत्रय	३१		वाञ्छाधिक	२५
भ	भणितमिदं जय	२७		वाति मलयजपवने	३०
	भवनबहिः परि	४		वादयते बहुविध	३५
	भवनिगडदलन	१		वादयते मृदुवेणु	७
	भवभयभञ्जन	३		वादयामि मृदु	६
	भाषितमिति	३५		विकलितसुरकुल	२१
	भ्रमरकदम्ब	१८		विकसितकुसुम	३१
म	मञ्जुलवञ्जुल	२६		विकिरति काऽपि च	१५
	मत्तकरीन्द्र	७		विदधति शङ्कर	२५
	मन्दगलच्छ्रम	७		विधिहरिगिरिशे	१०
	मनसिजनृपति	१८		विमले मम देहे	२१
	मारुतचालित	१८		विरहकृशां तव	२२
	मुखमारुत	३२		विरचय गण्डयुगं	३४
	मुखशशधर	३२		विराजति रास	३३
	मुखशशिसृत	१२		विरुवति परभृति	२८
	मृगपतिवाहिनि	४		विलिखति धरणीं	२८
	मृदु पवनावलि	४		विलुलितवेणी	३३
	मृदुलसमीरण	२३		विशदमुदारं वक्षसि	१६
	मृदुलसमीरे	३१		विश्वमतिमोहद	१३
य	यावदुदयति न	१३		विहरति विपिने	२३
र	रक्तकरतलं	१६	श	शङ्करी शङ्कर !	२८
ल	लयसमरे तलराशौ	२		शरदुपशीलन	१८
	लोहितभासि	२५		शंखनिनदपरि	१५
व	वचननिमीलन	१२		शशधरधर	१५
	वत्सतरप्रतिबिम्ब	२६		शशधरवदने	४
	वर्णितमेतदुमा	७		शशिशेखर कुरु	३४

गीतानि		पृष्ठसंख्याः
	शिवजय शिवजय	३१
	शिव शिव इति	२८
	शिवे ! रम्यरूपे	१६
	शिशुकुलमधुना	१२
	शिष्टगणमानस	१३
	शैलसुते ! मम	२४
	श्रवणतटसीम	१६
	श्रीजयनारायण	४
	श्रीजयनारायण	८
	श्रीजयनारायण	६
	श्रीजयनारायण	११
	श्रीजयनारायण	१३
	श्रीजयनारायण	१६
	श्रीजयनारायण	२१
	श्रीजयनारायण	२२
	श्रीजयनारायण	२४
	श्रीजयनारायण	२६
	श्रीजयनारायण	२६
	श्रीजयनारायण	३१
	श्रुतिरसि मतिः	२१
स	सकलकलापरि	२७

गीतानि		पृष्ठसंख्याः
	सजलघनकिरण	१६
	सन्निधिमेत्य	२१
	सम्मुखगतनिज	२६
	समरशिरसि	३
	सार्द्रालक्तकसुचरण	२४
	सा विपिने शिवजाया	२६
	सीदति विरही कुञ्जे	३०
	सुकृतवतां सुकृतं	१०
	सुविमलसुघने	१६
	सुविशदपृष्ठतलं	२७
	स्फुरदभिराम	८
	स्फुरति विशाले	१६
	स्रस्तं स्रस्तं विष	२८
	स्वकथितवेदम्	३
	स्वपिति धरणी	३०
ह	हंसि म्लेच्छचयान्	३
	हत्वा दशवदनं	२
	हिमगिरिराजसुता	७
क्ष	क्षीणतरां त्वांम्	२२
	क्षुध्रितान्नवतृण	२६

पद्यानामनुक्रमः

●

	पद्यानि	पृष्ठसंख्याः		पद्यानि	पृष्ठसंख्याः
अ	अतः परं दुष्करं	१६		ततः समाहृत्य	६
	अत्रान्तरे तत्र	३३		ततो मृगेन्द्रं	१८
	अत्रान्तरे तद्विपिन	३५		तत्रोदञ्चन्	२४
	अत्रान्तरे निज	१५		तत्र सा कृति	२६
	अथवाऽस्मिन्	१		तस्याकलय्य	११
	अथ सान्द्रतरा	२०		तस्याः समीपे	१०
	अन्योन्यप्रतिबिम्बितं	२०		त्वं याहि काशी	२८
	अष्टाभिर्मिथुनैः	३३		तां दृष्ट्वा हृष्ट	७
	आनन्दतुन्दिल	१		तास्ता दृष्ट्वा	१९
इ	इत्थं मनः	१४	द	देवानां प्रणिपात	२२
	इत्याकर्ण्य गिरं	५	न	नान्यद्ध्यायति	३०
	इति जनकजनन्योः	१०		नित्या सर्वगता	१७
	इति ब्रुवन्तं	२०		निवसामि	३०
	इति स्तुतौ तौ	३६		निःसारान्चपलेन्द्र	२६
क	कृताञ्जलिः	१०		नेत्राम्बुभिः	६
	क्व त्रिलोकजननी	१	प	पत्युः कदाचिदथ	२३
घ	घोरान्तःकरणा	२५		पद्मालया किञ्च	६
ज	जगन्मातुर्लीला	२४		प्रातः प्रेमभरालसा	४
त	ततो घृताभीर	२३		पीयूषद्युति	२९
	ततः प्रियाप्रेम	३१		प्रौढाङ्गनामृदुल	२८
	ततो बहुविधे	३३	ब	बहुजन्मार्जितैः	१३
	ततो भूधरराजस्य	३४		बाणानपाङ्ग	२७

पार्वतीगीते समागतवृत्तलक्षणानि

•

अनुष्टुम्	श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् । द्विचतुष्पादयो ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ ३, २३, ३५, ४३, ५४, ६०, ६१ ।
इन्द्रवज्रा	स्यादिन्द्रवज्रा यदि तौ जगौ गः । १६, १९, २१, २५
उपेन्द्रवज्रा	उपेन्द्रवज्रा जतजास्ततो गौ । १४, २८, ३९,
उपजातिः	अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीवुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥ ७, ८, ९, १०, १७, २४, ३१, ५३, ५८, ६२, ६३, ६४
द्रुतविलम्बितम्	द्रुतविलम्बितमाह नभौ भरौ । २२
मालिनी	ननमयययुतेयं मालिनी भोगिलोकैः । १५
रथोद्धता	रात्परैर्नरलगैः रथोद्धता । २, ४५
वंशस्थ	जतौ तु वंशस्थमुदीरितं जरौ । ३६, ४७, ५०, ५६
वसन्ततिलका–	उक्ता वसन्ततिलका तभजा जगौ गः । १, १८, २७, ३३, ३८, ४८, ४९
शार्दूलविक्रीडितम्	सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् । ५, ६, ११, १३, २०, २६, २९, ३०, ३४, ३७, ४१ ४४, ४६, ५१, ५२, ५५, ५७, ५९, ६५
शिखरिणी	रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी । ३२, ४२
स्रग्धरा	म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । ४, १२
मन्दाक्रान्ता	मन्दाक्रान्ता जलधिषडगैर्म्भौनतौ ताद्गुरूचेत् । ४०

•

राष्ट्रिय संस्कृत संस्थान
पुस्तकालय
क्रमांक 12148

डॉ० प्रभातशास्त्रिसम्पादितसंस्कृतपुस्तकसूची

अध्यात्मरामायणम्		महाराजश्रीविश्वनाथसिंहजूदेवकृत-व्यङ्ग्यप्रकाशिकाटीकासहितम्	७०००
रामगीतगोविन्दम्	(गीतकाव्यम्)	श्रीजयदेवः	१०.००
गीतपीतवसनम्	,,	श्रीश्यामरामकविः	५.००
गीतगिरीशम्	,,	कविनृपतिश्रीरामभट्टः	६.००
कृष्णगीतम्	,,	श्रीसोमनाथः	७.००
गीतगौरीपतिः	,,	श्रीभानुदत्तः	१५.००
सङ्गीतरघुनन्दनम्	,,	महाराजश्रीविश्वनाथसिंहजूदेवः	१५००
पार्वतीगीतम्	,,	श्रीजयनारायणघोषालः	५.००
चिमनीचरितम्	(प्रेमकाव्यम्)	श्रीनीलकण्ठशुक्लः	८.००
भगवदज्जुकम्	(प्रहसनम्)	श्रीबोधायनः	४.००
रसप्रदीपः	(साहित्यम्)	श्रीप्रभाकरभट्टः	८.००
लिङ्गानुशासनम्	(व्याकरणम्)	श्रीहर्षवर्धनः	५.००
लिङ्गविशेषविधिः	,,	आचार्यवररुचिः	४.००
भारतशतकम्	–	श्रीमहादेवशास्त्री	५.००
प्रतापविजयम्	(नाटकम्)	श्रीमूलशङ्करयाज्ञिकः	१०.००
छत्रपतिसाम्राज्यम्	,,	श्रीमूलशङ्करयाज्ञिकः	९.००
चन्द्रकलानाटिका	,,	आचार्यविश्वनाथः	८.०५
प्रतापविजयः	(काव्यम्)	श्रीईशदत्तशास्त्री 'श्रीशः'	५.००
रामगीता	,,	महाराजश्रीविश्वनाथसिंहजूदेवः	६.००
भाणद्वयम्		—	६.००
नर्ममाला		महाकविक्षेमेन्द्रः	६.००
देशोपदेशः		महाकविक्षेमेन्द्रः	६.००
समुद्रमथनम्	(समवकारः)	अमात्यवत्सराजः	५.००

प्राप्तिस्थानम्

कौशाम्बीप्रकाशनम्-दारागंज, इलाहाबाद-६